# रामायणस्य उपजीव्यत्वम् :एकम् अध्ययनम्

राजीव शर्मा

सहकारी अध्यापकः, संस्कृत विभागः

जाँजी हेमनाथ शर्मा महाविद्यालय

शिवसागर, असम।

**प्रस्तावनाः**

विश्वसाहित्ये वाल्मीकेः रामायणं आदिकाव्यरुपेन परिगण्यते । वाल्मीकिरपि आदि.शब्देन ज्ञायते । आदिकाव्यत्वमिति शब्दस्य आदि शब्देन श्रेष्ठं वा प्रथमं बोध्यते। रामायणं महाकाव्येषु श्रेष्ठं वा प्रथमञ्च । अतः रामायणं आदिकाव्यम् इति पण्डितानां मतम् । घटनैका अस्ति यद् एकदा कदाचिद् महर्षिः वाल्मीकिः माध्यन्दिनसवनाय स्वाश्रमस्य समीपस्थितां तमसानदीं प्राप । तत्र रमणीयकं स्वच्छप्रसन्नसलिलं सवीक्ष्य विचारितुमारेभे।तत्रैव केनापि निषादेन काममोहितं क्रौञ्चयुगलादेकं वध्यमानं दृष्ट्वा कवेः शोकत्वमागतः । अपि च सहसा मुखारविन्दात् शोकतरंगिनी वाणी श्लोकरुपेणैवं निःसृतवती –

‘मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।

यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम् ।।

महर्षे मुखनिर्गलितं करुणामयं चेदं पद्यं भारतीय काव्यस्य आदिकविता जाता । अतः वाल्मीकि आदिकविरिति आख्यां लभते । परमकल्याणमयीं वाणीं श्रुत्वा स्वयं ब्रह्मा समुपस्थितः वाल्मीकिं रामायणं रचयितुं अकथयत् । अनया प्रेरणया एव महर्षिः रामायणम् अरीरचत् । रामायणः भारतीय आर्यसमाजस्य यथोचित् चित्रणं अङ्कितो भवति । पिता पुत्रयोः सम्वन्धः, पति पत्न्याः प्रेम्नः, ज्येष्ठः कणिष्ठयोः स्नेहश्च यथा रामायणे वर्णितो भवति, न अन्यस्मिन् काव्ये । प्रजापालकरूपेण रामायणस्य नायकः रामस्य या भूमिका सा अतीव महती । रामस्य चरित्रस्य यत् सौकार्यं महत्वञ्च, नान्यत्र कस्मिन्नपि महाकाव्ये । सत्यरक्षणमेव मानवजीवनस्य श्रेष्ठो धर्मं इति यद् दृश्यते रामायणमहाकाव्ये, तदेव सनातन हिन्दुधर्मस्य मुख्य लक्ष्यम् ।

वाल्मीकेः रामायणं संस्कृत काव्यसाहित्यस्य नेतृत्वं करोति । रामायणमहाकाव्यस्यादर्शे संस्कृतसाहित्ये बहुनि काव्यानि विरचितानि अभवत् । तेषु कानिचन् महाकाव्यानि, कानिचन वा दूतकाव्यानि, कानिचन वा चम्पूकाव्यानि भवन्ति । रामायणकथामाश्रित्य महान्ति काव्यानि संस्कृत साहित्ये विरचितानि भूत्वा संस्कृत साहित्यस्य प्राचुर्यं वर्द्धयन्ति । अस्मिन् गवेषणापत्रे अहं संस्कृत साहित्ये रामायणस्य प्रभाव विषये तथा रामायणस्य उपजीवत्वम् इति विषये आलोचना कर्तुं चेष्टां करोमि ।

विषयस्य आलोचनाः

**महाभारते तथा पुराणसाहित्ये रामायणस्य प्रभावः** – रामायणाश्रितेषु काव्येषु प्रथमतः महर्षि व्यासदेवस्य महाभारतस्य नामं उल्लेखयोग्यं भवति । महाभारतस्य वनपर्वेषु ,शान्तिपर्वेषु च रामकथायाः विस्तृत विवरणम् अस्ति । पुराणग्रन्थेषु अपि रामायणस्य प्रभावः सुष्पष्टं दृश्यन्ते । हरिवंशे पुराणेषु च अपि रामायणी कथा प्राप्यते ।

अग्निः, विष्णुः, गरूड, भागवत, ब्रह्माण्ड, स्कन्दादि, पुराणेषुऽपि रामायणस्य नायकः रामचन्द्रस्य वीर्यकर्माणि प्रशंसितानि ।

**रामायणकाहिनीमवलम्ब्य विरचित रामायणग्रन्थाः –**

रामायणस्य कथामाश्रित्य परवर्तीकाले अनेकानि रामायणग्रन्थाः विरचितमस्ति । तानि यथा –

1) अध्यात्म रामायणम् ।
2) अद्भुत रामायणम् ।
3) अगस्त्य रामायणम् ।
4) आनन्द रामायणम् ।
5) मयन्दरामायणम् ।
6) भुसुण्डिरामायणम् ।

**काव्यग्रन्थे रामायणस्य प्रभावः**

महाकवि कालिदासः रामायणं पठित्वा एतावत् अभिभूतः भवति यत् स रघुवंशस्य काव्यमेव विरचितवान् । स स्वयमेव वदति –

"अथवा कृतवाग्द्वारे वंशेरस्मिन् पूर्वसूरिभिः।

मणै वज्रसमुत्कीर्णे सूत्रसेवास्ति मे मतिः।।( रघुवंशम्, 1/4)

रघुवंशम् उनविंशति सर्गात्मकं महाकाव्यम् । अत्र रघुवंशस्य कथा निबध्दा । दशमसर्गादारभ्य पञ्चदशसर्गपर्यन्तं रामस्य कथा वर्णिता । तदुत्तरं रामवंश्यानां तत्तन्नृपानां चरितान्युपन्यस्तानि । अन्तिमः सर्गे गर्भान्धस्याग्निवर्णस्याभिषेकेण समाप्यते

'तस्यास्तथाविधनरेन्द्रविपत्तिशोकाद्रष्णौर्विलोचनजलैः प्रथमाभितप्तः।

निर्वापितः कनककुम्भमुखोज्झितेन वंशाभिषेकविधिना शिशिरेण गर्भः '।।

कवि भट्टिः रामायणकथामाधारीकृत्य भट्टिकाव्यं विरचितवान् । द्वाविंशति सर्गानां महाकाव्यमेतद् प्रकीर्णं, अधिकार, प्रसन्न, तिङन्तेषु इति चतुर्षु काण्डेषु विभक्तमस्ति । तत्र सर्गपञ्चकाऽन्विते प्रकीर्णकाण्डे व्यामिश्ररूपाणि सामान्यविशेषकार्यप्रदर्शनपराणि तिङन्तरूपाणि प्रदर्शितानि। सर्गचतुष्टययुतेऽधिकारकाण्डे पाणिनीयाऽष्टकस्याऽधिकारसूत्राऽनुसारेण बहुप्रकाराणि लक्ष्यरूपाणि लोचनगोचरीकृतानि। सर्गचतुष्टयाऽलंकृते प्रसन्नकाण्डे समीचीनया विधया गुणाऽलंकारप्रदर्शनं विहितम्। एवं सर्गनवकविलसिते तिङन्तकाण्डे चतुर्थे लडादीनां नवानामपि लकाराणां विशिष्टरूपाणि प्रकृष्टमतिवैभवेन निदर्शितानि।इदं काव्यं रावणवधनाम्नापि प्रथते । कविः काव्यच्छलेन अत्र रामायणस्य प्रसिध्द रावणवधकथां वर्णयति । मर्यदापुरूषोत्तमस्याऽनुपमशमदमाऽऽदिविलसितस्य रघुकुलचन्दस्य भगवतः श्रीरामचन्दस्य जन्मतः प्रभृति रावणवधं यावदनुष्ठीयमानस्य लोकोत्तरचरितस्याऽत्र निबध्यमानत्त्वादस्य महाकाव्यस्याऽऽदौ रावणवधम् इत्येवाऽभिधाकं स्यादिति संभाव्यते।

भट्टिकाव्यं यद्यपि व्याकरणलक्षणप्रयोगज्ञानाय रचितमासीत् तथापि काव्यस्यास्य साहित्यिकं किमपि विहद्रञ्जकमेव विद्यते । काव्यस्य द्वितीय सर्गे शरदः, द्वादशसर्गे प्रभातस्य च रमणीयं वर्णनं विद्यते ।

कुमारदासस्य जानकीहरणं भारतीय वाङ्मयस्य उल्लखयोग्यं काव्यम् । ग्रन्थेऽस्मिन् रामायणीकथा चमत्कारितया निबध्दाऽस्ति । काव्यमिदं पञ्चविंशतिसर्गेषु विभक्तमस्ति। काव्यस्य प्रथमसर्गे दशरथवृत्तान्तम्, द्वितीये रावणपराजितानामिन्दादि देवानां नागलोके विष्णुसमीपोपसदनम, तृतीये ऋतुवर्णनम्, चतुर्थे पुत्रेष्टि नयागो रामस्य जन्म शिक्षाग्रहणं, वसिष्ठाज्ञया राक्षसवधोदयोगश्र पञ्चमे वसिष्ठाधिष्ठितपोवनवर्णनम्, षष्ठे मिथिलाप्रस्थानम्, सप्तमे विवाहः, अष्टमे रामसीतयोर्मधुयामिनीवर्णनम्, नवमे वरवध्वोः, अयोध्याप्रत्यावर्त्तनम्, दशमे रामवनवासः भरतकृतं तत्प्रार्थनं, सीताहरणञ्च, एकादशे गरूडरावणयोर्युध्दं गरूडवधः सुग्रीवसख्यादिकञ्च, व्दादशे शरद्वर्णनम्, त्रयोदशे सीतावियोगे रामस्य विलापितम्, चतुर्दशे सेतुवन्धनम्, पञ्चदशे रामेण रावणं प्रति सन्देशप्रेषणञ्च, शेषभागे रामायणकथैवानुसृता ।

महाकवि क्षेमेन्दः रामायणकथामाधारीकृत्य रामायणमञ्जरी नाम एकं काव्यं विरचितवान् । क्षेमेन्द्रस्य तथा रामायणमञ्जरी काव्यस्य भाषा मधुरा, सरसा सुवोधा चासीत् ।

कवि धनञ्जयस्य राघवपाण्डवोयम् काव्येऽपि रामायणस्य प्रभावः सुस्पष्टः। अत्र अष्टादशेषु सर्गेषु रामायणमहाभारतयोः कथे महता चातुर्येण निबध्दे। कविराज माधवभट्टः अपि व्दादशशतकान्तभागे राघवपाण्डवीयं नाम अन्यम् एकं काव्यं विरचितम्। रामचरित महाकाव्यस्य प्रणेता अभिनन्द आसीत्। तस्य कृतिः रामचरितं नाम महाकाव्यं 36 सर्गेषु विभक्तमासीत्। तध्दि सम्प्रति स्वरूपेण तु मैवोपलभ्यते किन्तु तध्दि भोजराजः महिमभट्टः च स्मरतः। अस्य पदावली सरला सरसा च वर्तते।

माधवभट्टः विरचित राघव पाण्डवीयं काव्यमपि रामायणकथामाधारीकृत्य विरचितं भवति। राघवपाण्डवीयं हि रामायणमहाभारताश्रितकथासम्वध्दं व्दिसन्धानकाव्यं त्रयोदशसर्गात्मकम्।

वत्सगोत्रोयस्य कोमटीयज्ञवनः पुत्रो विद्यारण्यस्य शिष्यो वामनभट्टबाणः त्रिंशत्सर्गात्मक रघुनाथचरिताख्य महाकाव्यं प्रणीतवान्। अस्मिन काव्ये रामस्य चरितं निपुणं चित्रितमस्ति।

रघुवंश – कुमारसम्भव – मेघदूत – किरातार्जुनीय – शिशुपालवध – नैषधादिग्रन्थानां व्याख्याता मल्लिनाथो रघुवीर चरितम् नाम महाकाव्यमपि प्रणीतवानसीदिति ज्ञायते, किन्तु ग्रन्थे लेखकत्वेन न कोऽपि समुल्लिखितः तथापि ग्रन्थोऽयं मल्लिनाथ प्रणीत इति आप्रेकटबृहत्सूच्यामुल्लिखितमस्ति। ग्रन्थेऽस्मिन् सप्तदशसर्गाः सन्ति यत्र हि रामस्य वनगमनादारभ्य राज्याभिषेकपर्यन्ता घटना वर्णिताऽस्ति। प्रसादमाधुर्यगुणसम्मतमिदं काव्यं सजातावुत्कृष्टस्थानं निदधाति ।1680 मितवक्रमाव्दमभितः स्थितिमतो मधुरायास्तिरूमलनायकाश्रितस्य चक्रकवेः जानकीपरिणयमहाकाव्यं प्रसिध्दम्। रामायण कथामाश्रित्य विरचित अत्र हि अष्टासु सर्गेषु रामस्य सीतया सह विवाहो वर्णितः।

**नाट्यसाहित्ये रामायणस्य प्रभावः**

रामायणाश्रितेषु नाटकेषु प्रथमतः भासस्य नाटकानां नामानि उल्लेखयोग्यानि। भासस्य नाटकत्रयोदशेषु व्दे प्रतिमानाटकम्, अभिषेक नाटकं च रामायणे मूले भवतः। प्रतिमानाटके रामायणप्रोक्तं रामस्य पूर्वचरितमुपनिबध्दम्। अभिषेकनाटकं प्रतिमा नाटकस्योत्तराध्दम्। अत्र हि रामायणे किष्किन्धा सुन्दरयुध्दकाण्डगता कथा संक्षिप्योपवर्णिताऽस्ति। इदमेव बालिवधसंज्ञयाऽपि व्यपदिश्यते। कालिदासस्य समकालिकः कविः भवभूतिरपि रामायणकथामाश्रित्य महावीरचरितम्, उत्तररामचरितं चेति व्दे प्रसिध्दे रूपके विरचितवान्। महावीरचरितं वीररस प्रधानं नाटकं, यत्र सन्ति सप्ताङ्काः। नाटकमिदं रामायणीयां रावणवधान्तां कथामाश्रित्य विरचितम्। कथ्यते भवभूतिना कवित्वाभ्यासकाले नाटकमिदं रचितम् ।अत्र रामायणकथायां नाटकोपयुक्तं परिवर्तनं कृतम्। अत्र राजनीतेर्विवेचनाऽकारणविसृता कियतांशेनाव्देगामिव जनयति। पात्राणां दीर्घदीर्घैर्भाषणैः कथावस्त्वन्तरितमिव प्रतीयते। चरित्रचित्रणदृष्ट्यारूपकमिदं न तथा प्रशंसनीयं यथेदमीयं रूपकान्तरम्।तत्र भवभूतेः उत्तररामचरितस्य कथानकं वाल्मीकि रामायणम् एव अनुसरति, पद्मपुराणस्थ रामकथायाःअपि प्रभावः नाटके दृश्यते । उत्तररामचरितं नाम श्रेष्ठा कृतिः किल भवभूतेः। प्रौढिप्राप्तेन खलु तेन इदं

प्रणीतमिति तावत् तस्यै शब्दब्रह्मविदः कवेः परिणतप्रज्ञस्य वाणीमिमाम् (उत्तररामचरितम्, 7,20)
इत्युक्तया स्पष्टम्। निर्मूलादपि लोकापवादाद भीतेन रामेण गृहाद्
रामायणे (उत्तरकाण्डे ) पठ्यते सैवास्य नाटकस्य विषयः, परं नाटकोपयोगाय भवभूतिना बहुशः संस्कृता
त्वेषा स्नातप्रसाधिता उहाद्या षोडशीव नूनमुद्भासते। तत्र भवभूतिनिर्वर्तितासु परिवृत्तिषु मुख्यतस्तु –
1.चित्रदर्शनम् 2. अदृश्यया सीताया वासन्तीरामयोः कथालापश्रवणम् 3. वासन्तीसमश्रं रामेण स्वानुरागस्य सीतागतत्वस्वीकरणम् 4. लवचन्दकेतुयुध्दम् 5. वसिष्ठादेः प्राचेतसाश्रमागमनम् 6. रामसमक्षं तस्यैवोत्तरचरितस्य नाटकेन प्रयोगश्चेत्येतावत्य इह नाम्ना कीर्तनमर्हन्ति। सप्ताङ्कमये नाटकेऽस्मिन्कविना करूणस्य पाकः परां नीष्ठां नीतः। वस्तुतस्तु विषयेऽत्र भवभूतेः प्रकर्षः काव्यन्तरेणानतिशयितो निशाम्यते। उत्तररामचरिते पाषाणाहृदया अपि द्रवन्ति रूदन्ति च। एको रसः करूण एव निमित्तभेदात्, इत्यादिना कविः स्वयमेव स्वगुणं स्फोरयतोवेत्याभाति।

उत्तररामचरिते च रामायणोत्तरकाण्डगता कथा भवभूतिः नाट्यरूपं दीयते। करूणरसप्रधानं नाट्यमिदं सप्ताङ्कम्। सीतापरित्यागः, रामविलापः, लवकुशप्राप्तिः, सीतास्वीकारश्चास्येतिवृत्तस्य मुख्यांशाः।

कवि राजशेखरोऽपि बालरामायणं नामं एकं नाटकं रामायणकथामाश्रित्य विरचितवान्। अत्र रामचरितमेव सविशेषं चित्रितमस्ति। बालरामायणमस्य दश‌ाङ्कं युक्तं नाटकम्। तानि दशाङ्कानि यथा – 1. प्रतिज्ञापौलस्त्यः 2. रामरावणीयः 3. विलक्षलङ्केश्वरः 4. भार्गवभङ्गः 5. उन्मत्तदशाननः 6. निर्दोषदशरथ 7. असमपराक्रमः 8. वीरविलासः 9. रावणविद्रवणः 10. सानन्दरघुनन्दनः।

कवि मुरारिः रामायणकथामाधारीकृत्य अनर्घराघवं नामकं नाटकं रचयित्वा तस्य पाण्डित्यं प्रकाशयति। अनर्घराघवं सप्ताङ्कः नाटकम्। अत्र हि रामायणगता विश्वामित्रस्य रामलक्ष्मणनिमित्तं दशरथप्रासादोपस्थितित अरिभ्य रामराज्यभिषेकपर्यन्ता कथा चित्रिताऽस्ति। नाटकमेदं साहित्यस्य मेरूदण्डो व्याकरणनैपुण्यस्य परोक्षानिकषमपि मन्यते।

प्रसन्नराघव नाम नाटकस्य रचयिता कवि जयदेवः आसीत्। अस्मिन ग्रन्थे रामायणस्य कथोपनिवध्दा। नाटकीयता दृष्ट्याऽतथासफलमपि काव्यसामान्यदृष्ट्योत्तमेऽस्मिन्प्रवन्धे सन्ति सप्ताङ्काः। अत्र हि रामस्य प्रसिध्दा कथा स्वानुकुल्येनोपस्थापिता नवीनकल्पनयोद्भाव्य, नाटकमिदं पद्यबाहुल्यमतोऽत्र नास्ति कथायां गद्यात्मकतया तथैवाभिनेयता च।

कवि दिङ्नागः कुन्दमाला नामकमेकं रूपकं विरचितवान्। अत्र रामायणोत्तरकाण्डगता कथा निवध्दाऽस्ति। इयं हि कुन्दमाला रामायणस्योत्तरकाण्डगतां सीतापरित्यागकथामाधारीकृत्य लिखिता।
बाल्मीकेराश्र्वमपरिसरे गोमत्यां नाम नद्यां वहन्ती कुन्दपुष्पमालां निरीक्ष्य रामस्तदभिज्ञानेन सीतां विज्ञातवानितिकथाभागमूलकंमस्य कुन्दमालेति नामकरणम्। ग्रन्थोऽयं षट्स्वङ्केषु विस्तृतः। इदं सुखान्तमेव नाटकम्।

कवि शक्तिभद्रेण आश्र्चर्यचूडामणिनामकं सप्ताङ्कविशिष्टं रूपकं प्राणायि। शक्तिभद्रस्य कविताशैली नितान्तसरलसरसा। अद्भुतरसप्रधानोऽस्मिन्नाटके आश्रमवासिप्रदत्तरत्नसाहार्येन रामो हि राक्षसप्रयुक्तमायातः स्वं राक्षितुं प्रभवतोत्यस्य संज्ञाऽऽश्र्चर्यचूडामणि इति।

रामायणकथामनुसृत्य हनुमन्नाटकनाम्नाऽपरं काव्यं लभ्यते। कथ्यते हि अस्य काव्यस्य प्रणेता पवनतनयो हनुमानासीत्। ग्रन्थेऽस्मिन दशरथवर्णनादारभ्य रामाभिषेकपर्यन्ता कथा यत्र तत्र स्वकल्पनया संस्कार्यापि वद्यवाहुल्येन वाक्येन वर्णिता। अत्र प्राकृतभाषा, विदूषकादिपात्राणि च नैवं दृश्यते।

**चम्पू साहित्ये रामायणस्य प्रभावः**

चम्पू साहित्ये अपि रामायणस्य प्रभावः सुस्पष्टमस्ति। चम्पू साहित्ये प्रख्यात ग्रन्थः रामायण चम्पू। चम्पूरामायणं हि चम्पूग्रन्थेषु सर्वोत्कृष्टकाव्यम्। अस्य प्रणेता भोजराजः। किस्किन्धाकाण्डपर्यन्तं काव्यमिदं भोजराजेन विरचितम्, शिष्टं काण्डत्रयं लक्ष्मणभट्टेन कृतम्। चम्पूरामायणस्य साहित्यिकं गौरवमतिमहत्वपूर्णम्। भोजस्य शव्दगुम्फः स्वभावसरलः अर्थराशिश्च चमत्कारातिशयशाली। अस्य वाल्मीकिकाव्यप्रशंसायां लिखितं

पद्यं नितान्तहृदयम् –

'वाल्मीकिगीतरघुपुङ्गवकीर्त्तिलेशै स्तृप्तिं करोमि कथ्यमप्य वुधानाम्।

गङ्गाजलैर्भूवि भगीरथ यत्नलव्धैः किं तर्पणं न विदधाति नरः पितृणाम्'।।

सीताया अशोकः वाटिकायां तिष्ठन्त्या दशां वर्णयति कविः –

'उपघ्नवृक्षस्य परोक्षभावादाश्रित्य भूमिं सुचिरं लुठन्त्याः।

नक्तञ्चरस्त्रोमुखकर्शितायाः सीतालतायास्त्रिजटा जटाऽभूत् '।।

तदिदमतिचमत्कारि चम्पूकाव्यम् ।

कविः वेङ्कटाध्वरिः उत्तरचम्पूकाव्यं रामायणकाहिनीमवलम्व्य विरचितम्। उत्तरचम्पूकाव्ये रामायणोत्तरकाण्डगता कथोपवर्णिताऽस्ति।

**दूतकाव्ये रामायणस्य प्रभावः**

दूतकाव्यमपि रामायणमाश्रित्य रचितं भवति। मेघदूतं कालिदासेन रामायणमनुसृत्य कथनं नासत्यम्। कालिदासः स्वयमपि तथ्यमिदं गोपयितुं नैच्छत्। यद्यसौ तथ्यमिदं गोपयितुमैषिष्यत् तदा स्वकाव्ये 'इत्याख्याते पवनतनयं मैथिलीवोन्मुखी सा' इति पद्यं कथमपि नायोजयिष्यत्। धोयी कवेः पवनदूतमपि रामायणमनुसृत्य रचितमासीत्। काव्येऽस्मिन् काचिदगन्धर्वकन्या लक्षणसेनं पवनहारेण प्रणयसन्देशं प्रेषयतति।

**परिशिष्टम्**

रामायणः संस्कृत काव्यसाहित्यस्य वाल्यरूपमस्ति। अश्वघोषस्य रचनासु एव रामायणस्य प्रभावो दृश्यते। जैन कवेः विमल सूरिणः पउमचरितम् इति काव्येऽपि रामायणस्य प्रभावः सुस्पष्टः। सन्ध्याकरनन्दोनो रामचरित काव्येऽपिपालवंशोभ्दवस्य रामपालस्य भगवतो रामस्य च वर्णनं श्लेषमयभाषयाऽकारि। ततः आधुनिक भारतीय भाषासु रामायणस्यानुवादग्रन्थाः, तथा रामायणस्य कथामाधारीकृत्य विरचिता अन्ये ग्रन्थाः, च भारतीय वाङ्मय साहित्यस्य गौरवं वर्द्धयन्ति। आधुनिक भारतीय भाषासु रामायणं सर्वप्रथमं तामिल भाषायाम् ईशवीय एकादशशतकऽनुदितम्। अस्य पश्चात् त्रयोदशशतके माधव कन्दली नाम्ना पण्डित प्रवराणा असमीया भाषायां रामायणं अनुदितम्। तुलसीदासकृत रामचरितमानस नामक ग्रन्थो बाल्मीकिरामायणमेवाश्रितम्। किमधिकं मैथिली भाषायां विरचितम् अस्मिन् ग्रन्थं रामायणादपि अधिकतरं प्रसिध्दिं अलभत्। अधुना भारतस्य काऽपि भाषा नास्ति, यत्र रामायणस्य अनुवादो न जातः स्यात्। न केवलं भारतीय भाषा, परन्तु वैदेशिकी भाषायामपि रामायणस्य अनुवादेन आत्मानं धन्यं मन्यते। ततः ईशवीय तृतीय शतके तिव्बत – चीनदेशयोः भाषायोरनुदितेषु बौध्दग्रन्थेष्वपि रामस्य वीर्यकर्माणि वर्णितानि। वर्मा (Indo – China) प्राच्याव्दीपादि भूभागेष्वपि रामायणं लोकप्रियत्वं प्रापत्। यव (Java) व्दीपे लाराजांग्राड – पमवनन – पनरतन नामक स्थानेषु शिवमन्दिरेषु देवगढस्थे विष्णुमन्दिरे च शिलासु रामायणवृत्तान्ताः शतव्दयाधिकसंख्यका उत्कीर्णाः प्राप्यन्ते। यव मलयव्दीपयोः साहित्येषु रामस्य चरितं वर्ण्यमानं दृश्यते। रामायणस्य पात्राणि नायकीकृत्य श्याम – बाली प्रभृति देशेषु दृश्यते साहित्यसृष्टिः।

रामायणस्य हि सम्प्रति चत्वारि संस्करणानि लभ्यते। तेषु हि दाक्षिणात्ये 643 सर्गाः, ओदीच्यपाठे 664 सर्गाः, गौडीयपाठे तु 500 सर्गाः दृश्यन्ते।

रामायणमाश्रित्य विभिन्नसम्प्रदायेषु समये समये रामायणस्य अनेकाः टीकाः समभूवन्। अस्य ग्रन्थस्य रामवर्मणस्तिलकारव्यटीका, अज्ञातकर्तृका कनकाख्या, नागेशभट्टस्य रामीया, माहेश्वरतीर्थस्य रामायणतत्वदीपिका, श्रीरामस्य अमृतकटकाख्या, गोविन्दराजस्य शृंगरभूषणाख्या, रामानन्दोतीर्थस्य रामायणकटाख्या, अहोवलस्य वाल्मीकिहृदयाख्या, अप्यदीक्षितस्य रामायणतात्पर्यसंरणिः, वरदराजस्य विवेकतिलकञ्चेति व्याख्याग्रन्थाः इति प्रसिध्दाः।

एवं प्रकारेण भारतीय तथा वहिर्भारतीय साहित्य जगति अपि रामायणस्य प्रभावः अपरिसीमः। अतः उच्यते –

"यावत् स्थास्यन्ति गिरयोःसरितश्च महीतले ।

.. तावत् रामायणीकथा लोकेषु प्रचरिष्यति "।। इति शम्।।

उपयोजित ग्रन्थसूचिः

1.Mishra, Acharya Ramachandra, Sanskrit Sahiteitihasa, Chowkhamba Vidyabhawan. Varanasi

2. पाण्डेय, मिथिलेश. गाइड वुक, उपकार प्रकाशन, आग्रा -2

3. शर्मा, थानेश्वर. संस्कृत साहित्यर इतिवृत्त, चन्द्र प्रकाश, पानवजार, गुवाहाटी -2.

4. गोस्वामी, देवमोहन, संस्कृत साहित्यर वुरञ्जी, बुकलेण्ड, पानवजार, गुवाहाटी -2.

5. ठाकुर, रवीन्द्रनाथ. प्राचीन साहित्य, विश्वभारती, कलिकता -1970

6. भट्टाचार्य, विमानचन्द्र. संस्कृत साहित्येर इतिहास, कलिकता, 1382

7. त्रिपाठी, राधावल्लभ, संस्कृत साहित्य का अभिनव इतिहास, विश्वविद्यालय प्रकाशन, वाराणसी.

8. Agrawal, H.R.A. Short History of Sanskrit Literature, Delhi.

9. Bhatt, G.K. Sanskrit Drama, Delhi, 1985.

10. Chatterjee, S.K. Ramayana, Calcutta, 1970

11. De, S.K and Dasgupta, S.N. History of Sanskrit Literature, Vol I. Calcutta, 1980

12. Vaidya, C.V. History of Sanskrit Literature (Vedic) Poona.1930